# শ্রীউমাত্রিশতীসহিতং নামাবলী

{॥ শ্রীউমাত্রিশতীসহিতং নামাবলী ॥}

উমা হৈমবতি দেবী মহাদেবী মহেশ্বরী ।

অজা ধূম্রা সুরূপৈকা বিশ্বসূর্বিশ্বধারিণী ॥ ১॥

শিবা ভগবতী ভদ্রা প্রকৃতির্বিকৃতিঃ কৃতিঃ ।

অনন্তাঽনাদিরব্যক্তা দুর্গপারা দুরাত্যযা ॥ ২॥

স্বধা স্বাহা সুধা পুষ্টিঃ সুখা সোমস্বরূপিণী ।

তুষ্টির্নিদ্রা বিষ্ণুমাযা জাতির্ধীশ্চেতনা চিতিঃ ॥ ৩॥

মাতা শান্তিঃ ক্ষমা শ্রদ্ধা হ্রীর্বৃত্তির্ব্যাপিনী স্মৃতিঃ ।

শক্তিস্তৃষ্ণা ক্ষুধা ভ্রান্তিঃ কান্তিঃ ছাযা রমা দযা ॥ ৪॥

ভবানী রাজসী সৃষ্টির্মৃডানী সাত্ত্বিকী স্থিতিঃ ।

রুদ্রাণী তামসী মৃত্যুঃ শর্বাণী ত্রিগুণা পরা ॥ ৫॥

কৃষ্ণা লক্ষ্মীঃ কামধেনুরার্যা দাক্ষাযণী সতী ।

গণেশজননি দুর্গা পার্বতি ব্রহ্মচারিণী ॥ ৬॥

গম্ভীরনাদবদ্ঘণ্টা কূষ্মাণ্ডা ষণ্মুখপ্রসূঃ ।

কাত্যায়নী কালরাত্রির্গৌরী সিদ্ধিপ্রদায়িনি ॥ ৭॥

অপর্ণা তাপসী বালা কন্যা কান্তারচারিণী ।
মহর্ষিস্তুতচারিত্রা ত্রিনেত্রার্ধাঙ্গভাগিনী ॥ ৮॥

রমণীয়তমা রাজ্ঞী রজতাদ্রিনিবাসিনী ।
গীর্বাণমৌলিমাণিক্যনীরাজিতপদাম্বুজা ॥ ৯॥

সর্বাগমস্তুতোপাস্যা বিদ্যা ত্রিপুরসুন্দরী ।
কমলাত্মা ছিন্নমস্তা মাতঙ্গী ভুবনেশ্বরী ॥ ১০॥

তারা ধূমাবতি কালী ভৈরবী বগলামুখী ।
অনুল্লঙ্ঘ্যতমা সন্ধ্যা সাবিত্রী সর্বমঙ্গলা ॥ ১১॥

ছন্দঃ সবিত্রী গায়ত্রী শ্রুতির্নাদস্বরূপিণী ।
কীর্তনীয়তমা কীর্তিঃ পাবনী পরমাম্বিকা ॥ ১২॥

উষা দেব্যরুষী মৈত্রী ভাস্বতী সূনৃতার্জুনী ।
বিভাবরী বোধয়িত্রী বাজিনী বাজিনীবতী ॥ ১৩॥

রাত্রিঃ পয়স্বতী নম্যা ধৃতাচী বারুণী ক্ষপা ।
হিমানিবেশিনী রৌদ্রা রামা শ্যামা তমস্বতী ॥ ১৪॥

কপালমালিনী ঘোরা করালাখিলমোহিনী ।
ব্রহ্মস্তুতা মহাকালী মধুকৈটভনাশিনী ॥ ১৫॥

ভানুপাদাঙ্গুলির্ব্রহ্মপাদা পাশ্যূরুজঙ্ঘিকা ।
ভূনিতম্বা শক্রমধ্যা সুধাকরপযোধরা ॥ ১৬॥

বসুহস্তাঙ্গুলির্বিষ্ণুদোঃসহস্রা শিবাননা ।
প্রজাপতিরদা বহ্নিনেত্রা বিত্তেশনাসিকা ॥ ১৭॥

সন্ধ্যাভ্রূযুগলা বাযুশ্রবণা কালকুন্তলা ।
সর্বদেবমযী চন্ডী মহিষাসুরমর্দিনী ॥ ১৮॥

কৌশিকী ধূম্রনেত্রঘ্নী চণ্ডমুণ্ডবিনাশিনী ।
রক্তবীজপ্রশমনী নিশুম্ভমদশোষিণী ॥ ১৯॥

শুম্ভবিধ্বংসিনী নন্দা নন্দগোকুলসম্ভবা ।
একানংশা মুরারাতিভগিনী বিন্ধ্যবাসিনী ॥ ২০॥

যোগীশ্বরী ভক্তবশ্যা সুস্তনী রক্তদন্তিকা ।
বিশালা রক্তচামুণ্ডা বৈপ্রচিত্তনিষূদিনী ॥ ২১॥

শাকম্ভরী দুর্গমঘ্নী শতাক্ষ্যমৃতদাযিনী ।

ভীমৈকবীরা ভীমাস্যা ভ্রামর্যরুণনাশিনী ॥ ২২॥

ব্রহ্মাণী বৈষ্ণবীন্দ্রাণী কৌমারী সূকরাননা ।
মাহেশ্বরী নারসিংহী চামুণ্ডা শিবদূতিকা ॥ ২৩॥

গৌর্ভূর্মহীদ্যৌরদিতির্দেবমাতা দযাবতী ।
রেণুকা রামজননী পুণ্যা বৃদ্ধা পুরাতনী ॥ ২৪॥

ভারতী দস্যুজিন্মাতা সিদ্ধা সৌম্যা সরস্বতী ।
বিদ্যুদ্বজ্রেশ্বরী বৃত্রনাশিনী ভূতিরচ্যুতা ॥ ২৫॥

দণ্ডিনী পাশিনী শূলহস্তা খট্বাঙ্গধারিণী ।
খড্গিনী চাপিনী বাণধারিণী মুসলাযুধা ॥ ২৬॥

সীরাযুধাঙ্কুশবতী শঙ্খিনী চক্রধারিণী ।
উগ্রা বৈরোচনী দীপ্তা জ্যেষ্ঠা নারাযণী গতিঃ ॥ ২৭॥

মহীশ্বরী বহ্নিরূপা বাযুরূপাঽম্বরেশ্বরী ।
দ্যুনাযিকা সূর্যরূপা নীরূপাখিলনাযিকা ॥ ২৮॥

রতিঃ কামেশ্বরী রাধা কামাক্ষী কামবর্ধিনী ।
ভণ্ডপ্রণাশিনী গুপ্তা ত্র্যম্বকা শম্ভুকামুকী ॥ ২৯॥

অরালনীলকুন্তলা সুধাংশুসুন্দরাননা ।

প্রফুল্লপদ্মলোচনা প্রবাললোহিতাধরা ॥ ৩০॥

তিলপ্রসূননাসিকা লসৎকপোলদর্পণা ।

অনঙ্গচাপঝিল্লিকা স্মিতাপহাস্যমল্লিকা ॥ ৩১ ॥

বিবস্বদিন্দুকুণ্ডলা সরস্বতীজিতামৃতা ।

সমানবর্জিতশ্রুতিঃ সমানকম্বুকন্ধরা ॥ ৩২ ॥

অমূল্যমাল্যমণ্ডিতা মৃণালচরুদোর্লতা ।

করোপমেযপল্লবা সুরোপজীব্যসুস্তনী ॥ ৩৩॥

বিসপ্রসূনসাযকক্ষুরাভরোমরাজিকা ।

বুধানুমেযমধ্যমা কটীতটীভরালসা ॥ ৩৪ ॥

প্রসূনসাযকাগমপ্রবাদচুঞ্চুকাঞ্চিকা ।

মনোহরোরুযুগ্মকা মনোজতূণজঙ্ঘিকা ॥ ৩৫॥

ক্বণৎসুবর্ণহংসকা সরোজসুন্দরাঙ্ঘ্রিকা ।

মতঙ্গজেন্দ্রগামিনী মহাবলা কলাবতী ॥ ৩৬॥

শুদ্ধা বুদ্ধা নিস্তুলা নির্বিকারা

সত্যা নিত্যা নিষ্ফলা নিষ্কলঙ্কা।
অজ্ঞা প্রজ্ঞা নির্ভবা নিত্যমুক্তা
ধ্যেযা জ্ঞেযা নির্গুণা নির্বিকল্পা ॥ ৩৭॥

আগমাব্ধিলোডনেন সারভূতমাহৃতং
শৈলপুত্রিকভিধাশতত্রযামৃতং মযা।
যে ভজন্তি সূরযস্তরন্তি তে মহদ্ভযং
রোগজং চ বৈরিজং চ মৃত্যুজং সর্বজম্ ॥ ৩৮॥

॥ ইতি শ্রীভগবন্মহর্ষিরমণান্তেবাসিনো বাসিষ্ঠস্য

নরসিংহসূনোঃ গণপতেঃ কৃতিঃ উমাত্রিশতী সমাপ্তা ॥

অনুষ্টুব্বৃত্তম্ (১-৩৬)। ইন্দ্রবজ্রা (৩৭)। তূণকম্ (৩৮)।

উমাত্রিশতী নামাবলী
উমা।হৈমবতি। দেবী। মহাদেবী। মহেশ্বরী।
অজা। ধূম্রা। সুরূপা। একা। বিশ্বসূঃ। বিশ্বধারিণী ॥ ১-১১॥

শিবা। ভগবতী। ভদ্রা। প্রকৃতিঃ। বিকৃতিঃ। কৃতিঃ।
অনন্তা। অনাদি। অব্যক্তা। দুর্গপারা। দুরাত্যযা ॥ ১২-২২॥

স্বধা । স্বাহা । সুধা । পুষ্টিঃ । সুখা । সোমস্বরুপিণ্ । তুষ্টিঃ ।
নিদ্রা । বিষ্ণুমায়া । জাতিঃ । ধীঃ । চেতনা । চিতিঃ ॥ ২৩-৩৫॥

মাতা । শান্তিঃ । ক্ষমা । শ্রদ্ধা । হ্রীঃ । বৃত্তিঃ । ব্যাপিনী ।
স্মৃতিঃ । শক্তিঃ । তৃষ্ণা । ক্ষুধা । ভ্রান্তিঃ । কান্তিঃ ।
ছায়া । রমা । দয়া ॥ ৩৫-৫১॥

ভবানী । রাজসী । সৃষ্টিঃ । মৃডানী । সাত্ত্বিকী । স্থিতিঃ ।
রুদ্রাণী । তামসী । মৃত্যুঃ । শর্বাণী । ত্রিগুণা । পরা ॥ ৫২-৬৩॥

কৃষ্ণা । লক্ষ্মীঃ । কামধেনুঃ । আর্যা । দাক্ষায়ণী । সতী ।
গণেশজননি । দুর্গা । পার্বতি । ব্রহ্মচারিণী ॥ ৬৪-৭৩ ॥

গম্ভীরনাদবদ্ঘণ্টা । কূষ্মাণ্ডা । ষণ্মুখপ্রসূঃ ।
কাত্যায়নী । কালরাত্রিঃ । গৌরী । সিদ্ধিপ্রদায়িনি ॥ ৭৪-৮০॥

অপর্ণা । তাপসী । বালা । কন্যা । কান্তারচারিণী ।
মহর্ষিস্তুতচারিত্রা । ত্রিনেত্রার্ধাঙ্গভাগিনী । ॥ ৮১-৮৭॥

রমণীয়তমা । রাজ্ঞী । রজতাদ্রিনিবাসিনী ।
গীর্বাণমৌলিমাণিক্যনীরাজিতপদাম্বুজা ॥ ৮৭-৯১ ॥

সর্বাগমস্তুত । উপাস্যা । বিদ্যা । ত্রিপুরসুন্দরী । ।

কমলাত্মা । ছিন্নমস্তা । মাতঙ্গী । ভুবনেশ্বরী ॥ ৯২-৯৯॥

তারা । ধূমাবতি । কালী ।ভৈরবী । বগলামুখী ।

অনুল্লঙ্ঘ্যতমা । সন্ধ্যা । সাবিত্রী । সর্বমঙ্গলা ॥ ১০০-১০৮ ॥

ছন্দঃ । সবিত্রী । গাযত্রী । শ্রুতিঃ । নাদস্বরূপিণী ।

কীর্তনীযতমা । কীর্তিঃ । পাবনী । পরমা । অম্বিকা ॥ ১০৯-১১৮॥

উষা । দেব্যরুষী ।মৈত্রী । ভাস্বতী । সূনৃতা । অর্জুনী ।

বিভাবরী । বোধযিত্রী । বাজিনী । বাজিনীবতী ॥ ১১৯-১২৮ ॥

রাত্রিঃ । পযস্বতী । নম্যা । ধৃতাচী । বারুণী । ক্ষপা ।

হিমানিবেশিনী । রৌদ্রা । রামা । শ্যামা । তমস্বতী ॥ ১২৯-১৩৯ ॥

কপালমালিনী । ধোরা । করালা । অখিলমোহিনী ।

ব্রহ্মস্তুতা । মহাকালী । মধুকৈটভনাশিনী ॥ ১৪০-১৪৬ ॥

ভানুপাদাঙ্গুলিঃ । ব্রহ্মপাদা । পাশ্যূরুজঙ্ঘিকা ।

ভূনিতম্বা । শক্রমধ্যা । সুধাকরপযোধরা ॥ ১৪৭-১৫২ ॥

বসুহস্তাঙ্গুলিঃ । বিষ্ণুদোঃসহস্রা । শিবাননা ।

প্রজাপতিরদা । বহ্নিনেত্রা । বিত্তেশনাসিকা ॥ ১৫৩-১৫৮ ॥

সন্ধ্যা-ভ্রূযুগলা । বাযুশ্রবণা । কালকুন্তলা ।

সর্বদেবমযী । চন্ডী । মহিষাসুরমর্দিনী ॥ ১৫৯-১৬৪ ॥

কৌশিকী । ধূম্রনেত্রঘ্নী । চণ্ডমুণ্ডবিনাশিনী ।

রক্তবীজপ্রশমনী । নিশুম্ভমদশোষিণী ॥ ১৬৫-১৬৯ ॥

শুম্ভবিধ্বংসিনী । নন্দা । নন্দগোকুলসম্ভবা ।

একানংশা । মুরারাতিভগিনী । বিন্ধ্যবাসিনী ॥ ১৭০-১৭৫ ॥

যোগীশ্বরী । ভক্তবশ্যা । সুস্তনী । রক্তদন্তিকা ।

বিশালা । রক্তচামুণ্ডা । বৈপ্রচিত্তনিষূদিনী ॥ ১৭৬-১৮২ ॥

শাকম্ভরী । দুর্গমঘ্নী । শতাক্ষী । অমৃতদাযিনী ।

ভীমা । একবীরা । ভীমাস্যা । ভ্রামরী । অরুণনাশিনী ॥ ১৮৩-১৯১॥

ব্রহ্মাণী । বৈষ্ণবী । ইন্দ্রাণী । কৌমারী । সূকরাননা ।

মাহেশ্বরী । নারসিংহী । চামুণ্ডা । শিবদূতিকা ॥ ১৯২-২০০ ॥

গৌঃ । ভূঃ । মহী । দ্যৌঃ । অদিতিঃ । দেবমাতা । দযাবতী ।

রেণুকা । রামজননী । পুণ্যা । বৃদ্ধা । পুরাতনী ॥ ২০১-২১২ ॥

ভারতী । দস্যুজিন্মাতা । সিদ্ধা । সৌম্যা । সরস্বতী ।

বিদ্যুত্ । বাজ্রেশ্বরী । বৃত্রনাশিনী । ভূতিঃ । অচ্যুতা ॥ ২১৩-২২২॥

দণ্ডিনী । পাশিনী । শূলহস্তা । খট্বাঙ্গধারিণী ।

খড্গিনী । চাপিনী । বাণধারিণী । মুসলায়ুধা ॥ ২২৩-২৩০ ॥

সীরায়ুধা । অঙ্কুশবতী । শঙ্খিনী । চক্রধারিণী ।

উগ্রা । বৈরোচনী । দীপ্তা । জ্যেষ্ঠা । নারায়ণী । গতিঃ ॥ ২৩১-২৪০ ॥

মহীশ্বরী । বহ্নিরূপা । বায়ুরূপা । অম্বরেশ্বরী ।

দ্যুনায়িকা । সূর্যরূপা । নীরূপা । অখিলনায়িকা ॥ ২৪১-২৪৮ ॥

রতিঃ । কামেশ্বরী । রাধা । কামাক্ষী । কামবর্ধিনী ।

ভগুপ্রণাশিনী । গুপ্তা । ত্র্যম্বকা । শম্ভুকামুকী ॥ ২৪৯-২৫৭॥

অরালনীলকুন্তলা । সুধাংশুসুন্দরাননা ।

প্রফুল্লপদ্মলোচনা । প্রবাললোহিতাধরা ॥ ২৫৮-২৬১ ॥

তিলপ্রসূননাসিকা । লসৎকপোলদর্পণা ।

অনঙ্গচাপঝিল্লিকা স্মিতাপহাস্যমল্লিকা ॥ ২৬২-২৬৫ ॥

বিবস্বদিন্দুকুণ্ডলা । সরস্বতীজিতামৃতা ।

সমানবর্জিতশ্রুতিঃ । সমানকম্বুকন্ধরা ॥ ২৬৬-২৬৯ ॥

অমূল্যমাল্যমণ্ডিতা । মৃণালচারুদোর্লতা ।

করোপমেযপল্লবা । সুরোপজীব্যসুস্তনী ॥ ২৭০-২৭৩ ॥

বিসপ্রসূনসাযকক্ষুরাভরোমরাজিকা ।

বুধানুমেযমধ্যমা । কটীতটীভরালসা ॥ ২৭৪-২৭৬ ॥

প্রসূনসাযকাগমপ্রবাদচুঞ্চুকাঞ্চিকা ।

মনোহরোরুযুগ্মকা । মনোজতূণজঙ্ঘিকা ॥ ২৭৭-৭৯ ॥

ক্বণৎসুবর্ণহংসকা । সরোজসুন্দরাঙ্ঘ্রিকা ।

মতঙ্গজেন্দ্রগামিনী । মহাবলা । কলাবতী ॥ ২৮০-২৮৪ ॥

শুদ্ধা । বুদ্ধা । নিস্তুলা । নির্বিকারা ।

সত্যা । নিত্যা । নিষ্ফলা । নিষ্কলঙ্কা ।

অজ্ঞা । প্রজ্ঞা । নির্ভবা । নিত্যমুক্তা

ধ্যেযা । জ্ঞেযা । নির্গুণা । নির্বিকল্পা ॥ ২৮৫-৩০০ ॥

From the complete volume 1 of collected works of Ganapati Muni

Encoded and proofread byDPD

Please send corrections to sanskrit@cheerful.com

Last updated ড়oday

http://sanskritdocuments.org

Uma Trishati Namavali Lyrics in Bengali PDF
% File name : umAtrishatievamnAmAvalI.itx
% Category : trishatinAmAvalI
% Location : doc_devii
% Author : Ganapati Muni with Ramana Maharshi
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : DPD
% Proofread by : DPD
% Description-comments : From Complete Works of Ganapati Muni Vol 1
% Latest update : November 24, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website